## लुक् स्त्रियाम् । (१०९/१११२)

आङ्गिरसे इत्येव । वतण्डशब्दादाङ्गिरस्यां स्त्रियां यञ्प्रत्ययस्य लुक् भवति । लुकि कृते शार्ङ्गरवादिपाठान् ङीन् भवति । वतण्डी । आङ्गिरस [1]इति किम् ? वातण्डयायनी । शिवाद्यणि तु वातण्डी ॥

## अश्वादिभ्यः फञ् । (११०/१११३)

आङ्गिरस इति निवृत्तम् । अश्वादिभ्यः गोत्रापत्ये फञ् प्रत्ययो भवति । [2]आश्वायनः । आश्मायनः । ये त्वत्र प्रत्ययान्ताः पठचन्ते तेभ्यः सामर्थ्याद् यूनि प्रत्ययो विज्ञायते ।

अश्व । अश्मन् । शङ्ख । बिद । पुट । रोहिण । खर्जूर । खर्जूल । [3]पिञ्जूर । भडिल । भण्डिल । भडित । भण्डित । [4]भण्डिक । [5]प्रहृत । रामोद । क्षत्र । ग्रीवा । [6]काश । गोलाङ्क्य । अर्क । स्वन । ध्वन । पाद । चक्र । कुल । [7]पवित्र । गोमिन् । श्याम । धूम । [8]धूम्र । [9]वाग्मिन् । विश्वानर । कुट । वेश । '[10]शप आत्रेये' (ग. सू. ७३) । नत्त । तड । नड । ग्रीष्म । [11]अर्ह । विशम्य । विशाला । गिरि । चपल । [12]चुनम । दासक । वैल्य । [13]धर्म । आनडुह्य । पुंसिजात । अर्जुन । शूद्रक । सुमनस् । [14]दुर्मनस् । क्षान्त । प्राच्य । कित । काण । चुम्प । श्रविष्ठा । वीक्ष्य । पविन्दा । 'आत्रेय भारद्वाजे' (ग. सू. ७४) । कुत्स । आतव । कितव । शिव । खदिर । भारद्वाज आत्रेये (ग. सू. ७५) ॥

## भर्गात् त्रैगर्ते । (१११/१११४)

भर्गशब्दादपत्ये विशेषे त्रैगर्ते गोत्रे फञ् प्रत्ययो भवति । भार्गायणो [15]भवति त्रैगर्तः चेत् । भार्गिः अन्यः ॥

## शिवादिभ्योऽण् । (११२/१११५)

गोत्रे इति निवृत्तम् । अतः प्रभृति सामान्येन प्रत्ययाः विज्ञायन्ते । शिवादिभ्योऽपत्ये अण् प्रत्ययो भवति । यथायथमिञादीनामपवादः । शैवः । प्रौष्ठः । तक्षन् शब्दोऽत्र पठचते कारिलक्षणमुदीचामिञं बाधितुम् । ण्यत्-प्रत्ययस्य तु बाधो नेष्यते । ताक्ष्णः, ताक्षण्यः । गङ्गाशब्दः पठचते तिकादिफिञा शुभ्रादिढका च समावेशार्थम् । तेन त्रैरूप्यं भवति । गाङ्गः, गाङ्गायनिः, गाङ्गेयः । विपाशशब्दः पठचते कुञ्जादिलक्षणेन च्फञा समावेशार्थम् । वैपाशः, वैपाशायन्यः ।

शिव । प्रौष्ठ । प्रौष्ठिक । चण्ड । जम्भ । मुनि । सन्धि । भूरि । कुठार । अनभिम्लान । ककुत्स्थ । कहोड । लेख । रोध । खञ्जन । कोहड । पिष्ट । हेहय । खञ्जार । खञ्जाल । सुरोहिका । पर्ण । कहूष । परिल । वतण्ड । तृण । कर्ण । क्षीरह्रद । जलह्रद । परिषिक । जटिलिक । गोफिलिक । बधिरिका । मञ्जीरक । वृष्णिक । रेख । आलेखन । विश्रवण । रवण । वर्तनाक्ष । पिटक । पिटाक । तृक्षाक । नभाक । ऊर्णनाभ । जरत्कारु । उत्क्षिपा । रोहितिक । आर्यश्वेत । सुपिष्ट । खर्जूरकर्ण । मसूरकर्ण । तूणकर्ण । मयूरकर्ण । खडरक । तक्षन् । ऋष्टिषेण । गङ्गा । विपाश । यस्क । लह्य । द्रुघ । अयःस्थूण । भलन्दन । विरूपाक्ष । भूमि । इला । सपत्नी । 'द्वयचो नद्याः' (ग.सू. ७६) । 'त्रिवेणी त्रिवणं च' (ग.सू. ७७) ॥

---

1. इत्येव फ. ब. 2. अश्वायनः ब. 3. नास्ति ब. 4. भडिक ब. 5. प्रकृत ब. 6. काशतृण ब. 7. श्रविष्ठ पवितृ ब. 8. नास्ति ब. 9. वामन ब. 10. जम वह खड खेड ग्रीष्म ब, शय आत्रेये प मं. 11. वशंक ब. 12. चुमंद ब. 13. धाय्य ब. 14. ओजस् ब. 15. त्रैगर्तश्चेद्भवति क.